संस्कृत-वार्ता:

02.07.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी सदने विपक्षिणां सांसदानां कोलाहलमध्ये राष्ट्रपते: अभिभाषणे धन्यवाद प्रस्तावे लोकसभायां प्रत्युत्तरं प्रदत्तवान्।
- प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रिय-जनतान्त्रिक-संयुते: सदस्यान् निवेदितवान् यत् तै: संसदीयलोकतन्त्रस्य सिद्धान्ता: स्थापनीया: उचिताचरणस्य च प्रदर्शनं करणीयम्।
- असमराज्ये जलौघस्थिति: गभीरा। नवदशजनपदानां षड्लक्षं जना: प्रभाविता:। गुजरात-उत्तराखण्ड-बिहारराज्येषु अतिवृष्टि: समङ्किता।
- ब्राजीलदेशस्य दक्षिणीयराज्ये रिओ-ग्रान्ड-डो-सुल इत्यत्र जलप्लावेन भू-स्खलनेन च न्यूनातिन्यूनं नवसप्तत्यधिकैकशतं जना: मृत्युम् उपगता: त्रयस्त्रिंशत् च जना: विलुप्ता: सन्ति।

<u>प्रधानमन्त्री-लोकसभा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रोक्तवान् यत् तस्य सर्वकारः सम्पूर्णतया <u>भारतं प्रथमम्</u> इति आदर्शवाक्येन पथप्रदर्शितः अस्ति सहैव भ्रष्टाचार-विरुद्धं शून्यसहिष्णुतायाः तस्य नीतय: सद्यः जाते लोकसभानिर्वाचने जनैः समर्थनप्राप्ताः सन्ति । सः अवदत् यत् तस्य सर्वकारेण तुष्टीकरणेन विना, सर्वेभ्यः न्यायस्य नीतिः स्वीकृता अस्ति । श्रीमोदिना लोकसभायां द्वयोः सदनयोः संयुक्तसभायां राष्ट्रपतिद्रौपदी मुर्मूवर्यायाः धन्यवादप्रस्तावस्य उत्तरं प्रयच्छता एतत् उक्तम्। विपक्षं लक्ष्यं कृत्वा प्रधानमन्त्रिणा उक्तं यत् सः तेषां दुःखम् अवगन्तुं शक्नोति, यतः दुर्सूचनाप्रसारणं कृत्वा अपि लोकसभानिर्वाचने विपक्षः पराभूतः । श्रीमोदी सामान्य-निर्वाचनेषु परिपक्वतां प्रज्ञां च प्रदर्शितुं देशस्य जनानां प्रशंसाम् अकरोत् । सः अवदत् यत् जनाः तस्य सर्वकारस्य नीतिषु, अभिप्रायेषु, समर्पणे च विश्वसन्ति अतः एव ते तृतीयवारं एनडीए दलम् सत्तां प्रापयितुं मतदानं कृतवन्तः। श्रीमोदी प्रोक्तवान् यत् <u>सबका-साथ</u> <u>सबका विकास</u> इति मन्त्रेण सह तस्य सर्वकारः कार्यरतः अस्ति । यदा प्रधानमन्त्री सदने स्वभाषणं ददाति स्म तदा विपक्षस्य सांसदाः विभिन्न-विषयान् अधिकृत्य विरोधप्रदर्शनं कृतवन्तः । सभापतिः ओम-बिरला विपक्षिदलानां आचरणं प्रति अप्रसन्नतां प्रकटयन् सदने व्यवस्थां स्थापयितुं आग्रहं कृतवान् परन्तु ते उद्घोषान् कुर्वन्ति स्म ।

प्रधानमन्त्री संसत्सन्देश:

प्रधानमन्त्री नरेन्द्रमोदी अद्य राष्ट्रिय-लोकतान्त्रिक-संयुते: सांसदान् संसद: नियमानाम् अनुपालनाय संसदीय-लोकतन्त्रस्य सिद्धान्तान् स्थापनाय अनुकूलाचरणस्य प्रदर्शनाय च विनिवेदितवान्। श्रीमोदी अद्य प्रात: नवदिल्ल्यां एन.डी.ए.दलस्य उपवेशनं सम्बोधयन् इमां वार्तां कथितवान्। उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् संसदीय-कार्यमन्त्री किरेणरिजिजू: सूचितवान् यत् प्रधानमन्त्री सर्वेभ्य: एन.डी.ए. सांसदेभ्य: उचिताचरणं प्रति निजमार्गदर्शनमपि अयच्छत्। श्रीरिजिजू: पुन: प्रोक्तवान् यत् प्रधानमन्त्री सबलं प्रत्यपादयत् यत् प्रत्येकं सांसद: देशसेवायै नागरिकै: चित: जात:, यो हि केनापि दलेन सम्बद्धो वर्तते। राष्ट्रसेवा एव तस्य कर्तव्यमस्ति। प्रधानमन्त्री सांसदान् जल-पर्यावरण-सामाजिक-क्षेत्रेषु विशेषज्ञतां विकसितुम् अपि प्रोत्साहितवान्।

दक्षिणपश्चिमीय-वर्षर्तु:

दक्षिणपश्चिमीय-वर्षर्तु: सम्पूर्णे देशे आच्छादित:। भारतर्तु-विज्ञान-विभागेन संसूचितं यत् राजस्थान-हरियाणा-पञ्जाब-राज्येभ्य: वर्षर्तुप्रभाव: अग्रे प्रसरित:। गुजरात-बिहार-असम-मेघालय-राज्यानां केषुचित् भागेषु महती वृष्टि: जाता। मध्यप्रदेश-महाराष्ट्र-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-उत्तरप्रदेशेष्वपि अतिवृष्टि: समभवत्। ऋतुविज्ञानविभागेन अग्रे प्रख्यापितं यत् आगामिषु पञ्चदिवसेषु उत्तरपश्चिम-पूर्वोत्तरभारते सक्रियतया वर्षर्तु: प्रवर्धते। असमराज्ये जलौघस्थिति: गभीरा जाता। येन हि नवदशजनपदानां षड्लक्षाधिकं जना: जलौघप्रभाविता: जाता:। अपरत्र उत्तराखण्डराज्याय ऋतुविभागेन कुमाऊंक्षेत्रस्य अत्यधिकवृष्ट्या रक्तवार्णिकी सञ्चेतना प्रसारिता। कुमाऊमण्डलस्य सर्वेषु जनपदेषु अद्य विद्यालयेषु आंगनवाडी केन्द्रेषु च अवकाश: अपि घोषित:। तत्रैव अरूणाचलप्रदेशेऽपि नैरन्तर्येण जायमानया वृष्ट्या सामान्यं जनजीवनं प्रभावितं भवतीति।

भारतीय-प्रतिभूति-विनिमय-प्राधिकरणम्

भारतीय-प्रतिभूति-विनिमय-प्राधिकरणेन, अदानी-एंटरप्राइजेज-लिमिटेड इत्यस्य विपण्यंश-व्यापारस्य उल्लंघनम् अधिकृत्य हिंडनबर्ग-रिसर्च, नाथन-एंडरसन, मार्क-किंगडन चेत्यादिभ्यः संस्थाभ्यः सूचनादेशपत्रं प्रदत्तम्। मार्क- किंगडन मॉरीशस-स्थः विदेशि पोर्टफोलियो-निवेशकः अस्ति । षड्चत्वारिंशत् पृष्ठानां सूचनादेशपत्रे सेबी इत्यनेन आरोपः प्रख्यापितः अस्ति यत् हिंडनबर्ग-एंडरसन-संस्थे सेबी-अधिनियमान्तर्गतं नियमानाम् उल्लंघनं अकुरुताम् ।

बांसुरी-स्वराजः

भाजपादलस्य सांसदया बांसुरी-स्वराज इत्यनया अद्य लोकसभायां संयुक्त-अधिवेशनस्य राष्ट्रपते: अभिभाषणे सदनस्य मध्ये विपक्षस्य नेतु: राहुलगान्धी इत्यस्य टिप्पण्णीं विरुध्य सूचनादेश: प्रस्तुत । यदा सदनस्य कार्याचरणं आरब्धं तदा राहुलगान्धिना स्वभाषणे अनेकानि मिथ्यावक्तव्यानि कृतानि इति आरोपं कृत्वा बांसुरी स्वराजः सूचनादेशं प्रस्तुतम् अकरोत् ।

श्रीगान्धिनः काश्चन् टिप्पण्य: तथ्यतः अशुद्धाः भ्रामकाः च सन्ति, अस्मिन् विषये आवश्यकं कार्याचरणम् अपेक्ष्यते इति सा प्रोक्तवती ।

## ऑस्ट्रेलिया-वीजा

ऑस्ट्रेलियासर्वकारेण विदेशि-छात्रेभ्यः प्रदीयमानस्य विद्यार्थि-प्रवेशानुज्ञापत्रस्य शुल्कं द्विगुणित तोऽपि अधिकं कुर्वता षोडश-शतं डॉलरपरिमितं कृतम् अस्ति । अनेन निर्णयेन ऑस्ट्रेलियायां पठनेच्छुकाः लक्षाधिकाः भारतीय-छात्राः प्रभाविताः भविष्यन्ति । अनेन निर्णयेन छात्रेषु आक्रोशः अस्ति । अपरं महत्वपूर्ण-परिवर्तनानन्तरम् अधुना समुद्रयात्रा-आज्ञापत्रावेदनानि अनुमतानि न भविष्यन्ति । आवेदकैः अधुना ऑस्ट्रेलियया नैव अपितु विदेशेन प्रवेशानुज्ञापत्रावेदनं करिष्यते , अनेन अस्थायिस्नातकाः, आगन्तुकाः च अधुना ऑस्ट्रेलियायां निवसन्तः छात्रानुज्ञापत्राय आवेदनं न कर्तुं शक्ष्यन्ति । ऑस्ट्रेलिया-सर्वकारेण जुलाईमासस्य एकदिनाङ्कात् आरभ्य अस्थायि-स्नातक-प्रवेशानुज्ञापत्रस्य आवेदनं कुर्वतां छात्राणां आयु-सीमा पञ्चाशतत: अपचित्य पञ्चत्रिंशत् वर्षस्य कृता अस्ति। कनाडा, न्यूजीलैंड, अमेरिका, ब्रिटेन प्रभृतिषु देशेषु ऑस्ट्रेलियायाः प्रवेशानुज्ञापत्रावेदन-शुल्कं सर्वाधिकम् अस्ति।

## बेरिल-झञ्झावातः

बेरिल-झञ्झावातः अद्य विनाशकारि-झञ्झावातस्य रुपे परिवर्तित: अस्ति । अमेरिकायाः राष्ट्रिय-झञ्झावात-केंद्रस्य अनुसारम् अस्य प्रभावेण भवनानि क्षतिग्रस्तानि जातानि अपरत्र ग्रेनेडा इत्यस्य कराइकौ-द्वीप-क्षेत्रे भूस्खलनं सञ्जातम् अस्ति । ग्रेनेडा, सेंट-विंसेंट, ग्रेनेडाइंस् चेत्यादीनि क्षेत्राणि समेत्य अन्येषु द्वीपेषु अपि अतितीव्रवायुः प्रचलन्ति । यद्यपि अस्यां घटनायां कस्यापि व्रणितस्य सूचना न प्राप्ता अस्ति । सम्पूर्णे क्षेत्रे सञ्चार-सौविध्यानि प्रभावितानि सञ्जातानि सन्ति ।

## शंघाई-सहयोग-सङ्घटनम्

कजाखस्तानदेशस्य अध्यक्षतायां शंघाई-सहयोग-सङ्घटनपरिषद: चतुर्विंशतितमम् उपवेशनम् अस्य मासस्य चतुर्थे दिनाङ्के समायोज्यते। विदेशमन्त्री डॉ. एस्. जयशङ्कर: अस्तानायां शंघाई-सहयोग-संघटनसम्मेलने भारतीयदलस्य नेतृत्वं करिष्यति। सम्मेलनेऽस्मिन् वैश्विक-नेतार: सङ्घटनस्य व्यतीतानां विंशतिवर्षाणां क्रियाकलापानां विविध-पक्षीय-सहयोगस्थितेरपि च समीक्षां विधास्यन्ति।

ब्राजील-जलप्लाव:

ब्राजीलदेशस्य दक्षिणीयराज्ये रिओ-ग्रान्ड-डो-सुल इत्यत्र जलप्लावेन भू-स्खलनेन च न्यूनातिन्यूनं नवसप्तत्यधिकैकशतं जना: मृत्युम् उपगता: त्रयस्त्रिंशत् च जना: विलुप्ता: सन्ति। राज्यस्य नागरिक-सुरक्षाभिकरणेन प्रोदीरितं यत् दक्षिणराज्यस्य प्रायश: नवतिप्रतिशतं भागा: गुइबा-नद्या: प्रबलभावातिरेकेन जलप्लावनेन भू-स्खलनेन च प्रभाविता: सन्तीति।

।। इति वार्ता: ।।